# Shri Shivakamasundari Sahasranama Stotram

# શ્રીશિવકામસુન્દરીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrI shivakAmasundarI sahasranAmastotra 1

File name : shivakAmasundarIsahasranAmastotra.itx

Category : sahasranAma, devii, stotra, devI, pArvatI

Location : doc_devii

Proofread by : DPD

Description-comments : From bhRiNgiriTisaMhitAyAM

Latest update : August 23, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 17, 2024

*sanskritdocuments.org*

# શ્રીશિવકામસુન્દરીસહસ્રનામસ્તોત્રમ્

॥ પૂર્વપીઠિકા ॥

યસ્યાસ્સર્વં સમુત્પન્નં ચરાચરમિદં જગત્ ।
ઇદં નમો નટેશાન્યૈ તસ્યૈ કારુણ્યમૂર્તયે ॥

કૈલાસાદ્રૌ સુખાસીનં શિવં વેદાન્તગોચરમ્ ।
સર્વવિદ્યેશ્વરં ભૂતિરુદ્રાક્ષાલઙ્કૃતં પરમ્ ॥ ૧॥

સર્વલક્ષણસમ્પન્નં સનકાદિમુનીડિતમ્ ।
સંસારારણ્યદાવાગ્નિં યોગિરાજં યતેન્દ્રિયમ્ ॥ ૨॥

મુકુટેન્દુસુધાપૂરલબ્ધજીવકશીર્ષકમ્ ।
વ્યાઘ્રચર્માંમ્બરધરં નીલકણ્ઠં કપર્દિનમ્ ॥ ૩॥

સવ્યહસ્તે વહ્નિધરં મન્દસ્મિતમુખામ્બુજમ્ ।
ઢક્કાં ચ દક્ષિણે હસ્તે વહન્તં ચ ત્રિલોચનમ્ ॥ ૪॥

અભયં દક્ષહસ્તેન દર્શયન્તં મનોહરમ્ ।
ડોલહસ્તેન વામેન દર્શયન્તં પદામ્બુજમ્ ॥ ૫॥

કુઞ્ચિતં દક્ષપાદેન તિષ્ઠન્તં મુસલોપરિ ।
બ્રહ્મવિષ્ણ્વાદિવિનુતં વેદવેદ્યં નટેશ્વરમ્ ॥ ૬॥

પ્રણમ્ય પાર્વતી ગૌરી પપ્રચ્છ મુદિતાનના ।
સર્વલક્ષણસમ્પન્ના સર્વદા સર્વદા નૃણામ્ ॥ ૭॥

પાર્વત્યુવાચ -
શિવ! શઙ્કર! વિશ્વેશ! મહાદેવ! દયાનિધે!
સર્વાસાં ચૈવ દેવીનાં નામસાહસ્રમુત્તમમ્ ॥ ૮॥

પુરા પ્રોક્તં સદાનન્દ ! મહ્યં શ્રીપતિપૂજિત ! ।
શિવકામસુન્દરીનામ્નાં સહસ્રં વદ સુન્દર! ॥ ૯॥

સદ્યસ્સમ્પત્કરં પુણ્યં સર્વપાપપ્રણાશનમ્ ।
ઇત્યુક્ત્વા પાર્વતી દેવી તુષ્ટાવ નટનેશ્વરમ્ ॥ ૧૦॥

સત્યપ્રબોધસુખસન્તતિરૂપ વિશ્વ -
માયેન્દ્રજાલિકવરેણ્ય સમસ્તસાક્ષિન્ ।
સૃષ્ટિસ્થિતિપ્રલયહેતુકવિષ્ણુરુદ્ર
શ્રીમન્નટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૧॥

ભૂવારિવહ્નિપવનામ્બરચન્દ્રસૂર્ય -
યજ્વાષ્ટમૂર્તિવિમલીકૃતવિગ્રહેદશ ।
સ્વાઙ્ઘ્ર્યમ્બુજદ્વયનિષસ્તહૃદાં પ્રસન્ન !
શ્રીમન્નટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૨॥

લિઙ્ગાકૃતે પશુપતે ગિરિજાપતે ત્વં
નારાયણેશ ગિરિવાસ વિધીશ શમ્ભો
ભાલાક્ષ શઙ્કર! મહેશ્વર મન્મથારે
શ્રીમન્નટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૩॥

શ્રીનીલકણ્ઠ શમનાન્તક પઞ્ચવક્ત્ર
પઞ્ચાક્ષરપ્રિય પરાત્પર! વિશ્વવન્દ્ય ।
શ્રીચન્દ્રચૂડ ગજવક્ત્રપિતઃ પરેશ
શ્રીમન્નટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૪॥

ગઙ્ગાધર પ્રમથનાથ સદાશિવાર્યા -
જાને! જલન્ધરરિપો જગતામધીશ ।
શર્વોગ્ર ભર્ગ મૃડ શાશ્વત! શૂલપાણે
શ્રીમન્નટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૫॥

સ્થાણો ત્રિણેત્ર શિપિવિષ્ટ! મહેશ! તાત
નારાયણપ્રિય કુમારગુરો કપર્દિન્ ।
શમ્ભો! ગિરીશ! શિવ લોકપતે! પિનાકિન્
શ્રીમન્નટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૬॥

ખઙ્ગાઙ્ગિન્ અન્ધકરિપો ભવ ભીમ રુદ્ર
દેવેશ! ખણ્ડપરશો! કરુણામ્બુરાશે ।
ભસ્માઙ્ગરાગ પરમેશ્વર! વિશ્વમૂર્તે
શ્રીમન્નટેશ દેહિ કરાવલમ્બમ્ ॥ ૧૭॥

વિશ્વેશ્વરાત્મક વિવેકસુખાભિરામ
શ્રીવીરભદ્ર! મખહન્તરુમાસહાય ।
વીરેશ્વરૈણકર શુભ્રવૃષાધિરૂઢ
શ્રીમન્નટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૮॥

એવં સ્તુત્વા મહાદેવી પઞ્ચાઙ્ગં પ્રણનામ હ ।
તતસ્તુષ્ટો નટેશશ્ચ પ્રોવાચ વચનં શુભમ્ ॥ ૧૯॥

એવમેવ પુરા દેવી મહાલક્ષ્મીઃ પતિવ્રતા ।
શઙ્ખચક્રગદાપાણિઃ સર્વલોકહિતાવહઃ ॥ ૨૦॥

ધર્મસંસ્થાપનાર્થાયાવતારાન્યુગે યુગે ।
કરિષ્યતિ મહા વિષ્ણુઃ મમ ભર્તા દશ શ઼ૃણુ ॥ ૨૧॥

મત્સ્યઃ કૂર્મો વરાહશ્ચ નારસિંહોઽથ વામનઃ ।
રામો દાશરથિશ્ચૈવ રામઃ પરશુધારકઃ ॥ ૨૨॥

હલભૃત્ બલરામશ્ચ કૃષ્ણઃ કલ્કિઃ દશ સ્મૃતાઃ ।
અવતારેષુ દશસુ મદ્ભર્તુર્નાશશઙ્કયા ॥ ૨૩॥

પ્રાપ્તા ભવન્ત શરણં ભવાનેવ પરા ગતિઃ ।
ઇત્યુક્ત્વા ચ મહાલક્ષ્મીર્ભસ્તાનામિષ્ટદાયકમ્ ॥ ૨૪॥

વેદપાદસ્તવં ચારુ મધુરં મધુરાક્ષરમ્ ।
ઉક્ત્વા તુષ્ટાવ મુદિતા નટેશાનં મહેશ્વરમ્ ॥ ૨૫॥

વિઘ્નેશ્વરં વીતવિરાગસેવિતમ્
વિધીન્દ્રવિષ્ણ્વાદિનતાઙ્ઘ્રિપઙ્કજમ્ ।
સભાસદામાશુ સુખાર્થસિદ્ધિદં
ગણાનાં ત્વાં ગણપતિં હવામહે ॥ ૨૬॥

નગેન્દ્રતનયારમ્યસ્તન્યપાનરતાનનમ્ ।
માણિક્યકુણ્ડલધરં કુમારં પુષ્કરસ્રજમ્ ॥ ૨૭॥

નમઃ શિવાય સામ્બાય સગણાય સસૂનવે ।
નમો જ્ઞાનસભેશાય દિશાં ચ પતયેનમઃ ॥ ૨૮॥

નમો બ્રહ્માદિદેવાય વિષ્ણુકાન્તાય શમ્ભવે ।

પીતામ્બરાય ચ નમઃ પશુનાં પતયે નમઃ ॥ ૨૯॥

સન્માર્ગદાય શિષ્ટાનામાશ્રિતાનાં દ્વિજન્મનામ્ ।
અભક્તાનાં મોહદાત્રે પથીનાં પતયે નમઃ ॥ ૩૦॥

અપસ્મારમધઃ કૃત્ય નૃત્યન્તં તસ્ય પૃષ્ઠકે ।
સર્વાભરણરમ્યં તં પશ્યેમ શરદશ્શતમ્ ॥ ૩૧॥

સુન્દરં સ્મેરવદનં નટરાજમુમાપતિમ્ ।
સમ્પૂજ્ય નૃત્યપાદં તે જીવેમ શરદશ્શતમ્ ॥ ૩૨॥

કુભીન્દ્રદૈત્યં હતવાનિતિ શમ્ભુર્જગત્પતિઃ ।
શ્રુત્વા તે કીર્તિમમલાં નન્દામ શરદશ્શતમ્ ॥ ૩૩॥

મન્મથાન્ધકસંહારકથાશ્રુતિમનોહરમ્ ।
શ્રુત્વા તે વિક્રમયુતં મોદામ શરદશ્શતમ્ ॥ ૩૪॥

સર્વદુઃખાન્વિહાયાશુ શિવ તેઽઙ્ઘ્રિયુગામ્બુજમ્ ।
અર્ચયન્તઃ સદા ધન્યા ભવામ શરદશ્શતમ્ ॥ ૩૫॥

ત્વત્કીર્તનં સદા ભક્ત્યા સર્વકલ્મષનાશનમ્ ।
શઙ્કરાઘહર સ્વામિન્ શૃણવામ શરદશ્શતમ્ ॥ ૩૬॥

ત્વચ્ચરિત્રં પવિત્રં ચ સર્વદારિદ્ર્યનાશનમ્ ।
અસ્મત્પુત્રપ્રણમૃણાં પ્રબ્રવામ શરદશ્શતમ્ ॥ ૩૭॥

ત્વદ્ભક્તકલ્પકતરુમાશ્રયન્તસ્સદા વયમ્ ।
ઇન્દ્રિયાદ્યૌઘનિચયૈરજીતાસ્સ્યામ શરદશ્શતમ્ ॥ ૩૮॥

એવં સ્તુત્વા મહાદેવી મહાલક્ષ્મીર્મનોહરા ।
પ્રણમ્ય ચિત્સભાનાથં તિષ્ઠન્તી મુદિતાનના ॥ ૩૯॥

મન્માઙ્ગલ્યસ્ય રક્ષાયૈ મન્ત્રમેકં મમાદિશ ।
તાં દૃષ્ટ્વા ચ મહાદેવઃ પ્રહસન્નિદમબ્રવીત્ ॥ ૪૦॥

ત્વં શીઘ્રં ગચ્છ દેવેશીં શિવકામાં ચ સુન્દરીમ્ ।
તત્ર ગત્વા મહેશાનીં પૂજય ત્વં વિશેષતઃ ॥ ૪૧॥

સહસ્રકુસુમૈઃ પદ્મૈઃ નૈવેદ્યૈશ્ચ મનોહરૈઃ ।
ઇત્યુક્ત્વા પરમપ્રીતો ભગવાન્ભક્તવત્સલઃ ॥ ૪૨॥

શિવકામસુન્દરીનામ્નાં સહસ્રં પ્રજગાદ હ ।
ઉપદિશ્ય ચ તાં દેવીં પ્રેષયામાસ શઙ્કરઃ ॥ ૪૩॥

લક્ષ્મીર્ગત્વા મહેશાનીં શિવકામીં મુદાન્વિતા ।
શિવોક્તેન પ્રકારેણ સહસ્રૈઃ પઙ્કજૈઃ ક્રમાત્ ॥ ૪૪॥

નામભિશ્ચ ત્રિતારૈશ્ચ યુક્ત્વૈશ્ચ સુમહત્તરૈઃ ।
પૂજયામાસ વિધિવત્ શિવાચિન્તનતત્પરા ॥ ૪૫॥

તદા શિવઃ શોધનાય તસ્યાઃ ચિત્તં જગત્પ્રભુઃ ।
આનીતેષુ ચ પદ્મેષુ ન્યૂનમેકં ચકાર હિ ॥ ૪૬॥

અતીવ દુઃખિતાલક્ષ્મીઃ પૂર્તિકામેચ્છયા સ્વયમ્ ।
અભાવપુષ્પસમ્પૂર્ત્યૈ નેત્રમુત્પાટ્ય વામકમ્ ॥ ૪૭॥

અર્ચયામાસ લક્ષ્મીશ્ચ ભક્ત્યા પરમયા યુતા ।
દૃષ્ટ્વેદં સુન્દરીદેવી શિવકામમનોહરી ॥ ૪૮॥

પૂર્વસ્માદપિ સૌન્દર્યં નેત્રં દત્વાઽતિહર્ષતઃ ।
તુષ્ટાઽહમિષ્ટં વ્રિયતાં વરમિત્યાહ શઙ્કરી ॥ ૪૯॥

તદા વવ્રે મહાલક્ષ્મીઃ સર્વલોકપ્રિયઙ્કરમ્ ।
સૌમઙ્ગલ્યં કુરુ મમ દીર્ઘં ચ ભવતુ ધ્રુવમ્ ।
તથા ભવતુ ભદ્રં તે વિષ્ણું ગચ્છ યથાસુખમ્ ॥ ૫૦॥

ઇત્યુક્ત્વાઽન્તર્દધે દેવી શિવકામી મહેશ્વરી ।
લક્ષ્મીશ્ચ વિષ્ણું ગત્વાઽથ યથાપૂર્વં સ્થિતોરસિ ॥ ૫૧॥

તાદૃશં નામસાહસ્રં શિવકામ્યાઃ મનોહરમ્ ।
વદામિ શ ૃણુ હે દેવીનામસાહસ્રમુત્તમમ્ ॥ ૫૨॥

ઋષિઃ છન્દો દેવતા ચ બીજં શક્તિશ્ચ કીલકમ્ ।
કરાઙ્ગન્યાસકૌ પૂર્વં સુરહસ્યં મહેશ્વરિ ॥ ૫૩॥

નામ્નાં ત્રિપુરસુન્દર્યાઃ યત્પ્રોસ્તં તદ્વદેવ હિ ।
શિવકામસુન્દરીપ્રીત્યૈ વિનિયોગો જપે સ્મૃતઃ ॥ ૫૪॥

દિગ્બન્ધં તતો ધ્યાયેત્ શિવકામીં મહેશ્વરીમ્ ।
તતશ્ચ પઞ્ચપૂજા ચ કર્તવ્યા મનુજાપિના ॥ ૫૫॥

તતઃ પરં સ્તોત્રમેતજ્જપ્તવ્યં ભદ્રકામિના ।

સ્તોત્રાન્તે ચ પ્રકર્તવ્યમઙ્ગન્યાસં ચ પૂર્વવત્ ॥ ૫૬॥

કૃત્વા ચ દિગ્વિમોકં ચ તતોધ્યાયેચ્ચ સુન્દરીમ્ ।
લમિત્યાદિમમન્ત્રૈશ્ચ પઞ્ચપૂજાં ચ સંવદેત્ ॥ ૫૭॥

ૐ અસ્ય શ્રી શિવકામસુન્દરીસહસ્રનામસ્તોત્રમહા
મન્ત્રસ્ય । આનન્દભૈરવદક્ષિણામૂર્તિઃ ઋષિઃ । દેવી ગાયત્રી
છન્દઃ । શ્રીશિવકામસુન્દરી દેવતા । બીજં શક્તિઃ કીલકં
કરાઙ્ગન્યાસૌ ચ શ્રીમહાત્રિપુરસુન્દરીમહામન્ત્રવત્ ।

॥ ધ્યાનમ્ ॥

પદ્મસ્થાં કનકપ્રભાં પરિલસત્પદ્માક્ષિયુગ્મોત્પલામ્
અક્ષસ્રક્ષુકશારિકાકટિલસત્ કલ્હાર હસ્તાબ્જિનીમ્ ।
રક્તસ્રક્સુવિલેપનામ્બરધરાં રાજીવનેત્રાર્ચિતાં
ધ્યાયેત્ શ્રીશિવકામકોષ્ઠનિલયાં નૃત્તેશ્વરસ્ય પ્રિયામ્ ॥

મુક્તાકુન્દેન્દુગૌરાં મણિમયમકુટાં રત્નતાણ્ટઙ્કયુક્તાં
અક્ષસ્રક્પુષ્પહસ્તા સશુકકટિકરાં ચન્દ્રચૂડાં ત્રિનેત્રીમ્ ।
નાનાલઙ્કારયુક્તાં સુરમકુટમણિદ્યોતિત સ્વર્ણપીઠાં
યાસાપદ્માસનસ્થાં શિવપદસહિતાં સુન્દરીં ચિન્તયામિ ॥

રત્નતાટઙ્કસંયુક્તાં સુવર્ણકવચાન્વિતામ્ ।
દક્ષિણોર્ધ્વકરાગ્રેણ સ્વર્ણમાલાધરાં શુભામ્ ॥

દક્ષાધઃ કરપદ્મેન પુલ્લકલ્હાર ધારિણીમ્ ।
વામેનોઽધ્વકરાબ્જેન શુકાર્ભકધરાં વરામ્ ।
કટિદેશે વામહસ્તં ન્યસ્યન્તીં ચ સુદર્શનામ્ ॥

શિવકામસુન્દરીં નૌમિ પ્રસન્નવદનાં શિવામ્ ।
લમિત્પાદિપઞ્ચપૂજા ॥

॥ શ્રી શિવકામસુન્દરીસહસ્રનામસ્તોત્રમ્ ॥

ૐ ઐં હ્રીં શ્રીં અં - ૧॥

અગણ્યાઽગણ્યમહિમાઽસુરપ્રેતાસનસ્થિતા ।
અજરાઽમૃત્યુજનનાઽપ્યકાલાન્તક ભીકરા ॥ ૧॥

અજાઽજાંશસમુદ્ભૂતાઽમરાલીવૃતગોપુરા ।

અત્યુગ્રાજિનટચ્છત્રુકબન્ધાનેકકોટિકા ॥ ૨॥

અદ્રિદુર્ગાઽણિમાસિદ્ધિદાપિતેષ્ટામરાવલિઃ ।
અનન્તાઽનન્યસુલભપ્રિયાઽદ્ભુતવિભૂષણા ॥ ૩॥

અનૂરુકરસઙ્કાશાઽખણ્ડાનન્દસ્વરૂપિણી ।
અન્ધીકૃતદ્વિજારાતિનેત્રાઽત્યુગ્રાટ્ટહાસિની ॥ ૪॥

અન્નપૂર્ણાઽપરાઽલક્ષ્યાઽમ્બિકાઽઘવિનાશિની ।
અપારકરુણાપૂરનિભરેખાં જનાક્ષિણી ॥ ૫॥

અમૃતામ્ભોધિમધ્યસ્થાઽણિમાસિદ્ધિમુખાશ્રિતા ।
અરવિન્દાક્ષમાલાલિપાત્રશૂલધરાઽનઘા ॥ ૬॥

અશ્વમેધમખાવાપ્તહવિઃપુજકૃતાદરા ।
અશ્વસેનાવૃતાઽનેકપારૂઢાઽપ્યગજન્મભૂઃ ॥ ૭॥

ઓં ઐં હ્રીં શ્રીં આં - ૨॥

આકાશવિગ્રહાઽઽનન્દદાત્રી ચાજ્ઞાબ્જભાસુરા ।
આચારતત્પરસ્વાન્તપદ્મસંસ્થાઽઽઢ્યપૂજિતા ॥ ૮॥

આત્માયત્તજગચ્ચક્રા ચાત્મારામપરાયણા ।
આદિત્યમણ્ડલાન્તસ્થા ચાદિમધ્યાન્તવર્જિતા ॥ ૯॥

આદ્યન્તરહિતાઽચાર્યા ચાદિક્ષાન્તાર્ણરૂપિણી ।
આદ્યાઽમાત્યુનુતા ચાજ્યહોમપ્રીતાઽઽવૃતાઙ્ગના ॥ ૧૦॥

આધારકમલારૂઢા ચાધારાધેયવિવર્જિતા ।
આધિહીનાઽઽસુરીદુર્ગાઽઽજિસઙ્ક્ષોભિતાસુરા ॥ ૧૧॥

આધોરણાજ્ઞાશુણ્ડાગ્રાકૃષ્ટાસુરગજાવૃતા ।
આશ્ચર્યવિયહાઽઽચાર્યસેવિતાઽઽગમસંસ્તુતા ॥ ૧૨॥

આશ્રિતાખિલદેવાદિવૃન્દરક્ષણતત્પરા ।
ૐ ઐં હ્રીં શ્રીં ઇં - ૩॥

ઇચ્છાજ્ઞાનક્રિયાશક્તિરૂપેરાવતિસંસ્તુતા ॥ ૧૩॥

ઇન્દ્રાણીરચિતશ્વેતચ્છત્રેઽઽભક્ષણપ્રિયા ।
ઇન્દ્રાક્ષીન્દ્રાર્ચિતેન્દ્રાણી ચેન્દિરાપતિસોદરી ॥ ૧૪॥

ઇન્દિરેન્દીવરશ્યામા ચેરમ્મદસમપ્રભા ।
ઇભકુમ્ભાભવક્ષોજદ્વયા ચેક્ષુધનુર્ધરા ॥ ૧૫॥

ઇભદન્તોરુનયના ચેન્દ્રગોપસમાકૃતિઃ ।
ઇભશુણ્ડોરુયુગલાચેન્દુમણ્ડલમધ્યગા ॥ ૧૬॥

ઇષ્ટાર્તિઘ્નીષ્ટવરદા ચેભવક્ત્રપ્રિયઙ્કરી ।
ૐ ઐં હ્રીં શ્રીં ઈં - ૪॥

ઈશિત્વસિદ્ધિસમ્પ્રાર્થિતાપસેષત્સ્મિતાનના ॥ ૧૭॥

ઈશ્વરીશપ્રિયા ચેશતાણ્ડવાલોકનોન્તુકા ।
ઈક્ષણોત્પન્નભુવનકદમ્બા ચેડ્યવૈભવા ॥ ૧૮॥

ૐ ઐં હ્રીં શ્રીં ઉં - ૫॥

ઉચ્ચનીચાદિરહિતાડપ્યુરુકાન્તારવાસિની ।
ઉત્સાહરહિતેન્દ્રારિશ્રીોરુસન્તોષિતામરા ॥ ૧૯॥

ઉદાસીનોડુરાવક્ત્રાડપ્યુગ્રકૃત્યવિદૂષણી ।
ઉપાધિરહિતોપાદાનકારણોન્મત્તનૃત્તકી ॥ ૨૦॥

ઉરુસ્યન્દનસમ્બદ્ધકોટ્યશ્વોરુપરાક્રમા ।
ઉલ્કામુખી હ્યુમાદેવી ચોન્મત્તક્રોધભૈરવી ॥ ૨૧॥

ૐ ઐં હ્રીં શ્રીં ઊં - ૬॥

ઊર્જિતણ્ોઢભુવનકદમ્બોર્ધ્વમુખાવલિઃ ।
ઊર્ધ્વપ્રસારિતાઙ્ઘ્રીશદર્શનોદ્વિગ્નમાનસા ॥ ૨૨॥

ઊહાપોહવિહીનોરુજિતરમ્ભામનોહરા ।
ૐ ઐં હ્રીં શ્રીં ઋં - ૭॥

ઋગ્વેદસંસ્તુતા ઋદ્ધિદાયિની ઋણમોચિની ॥ ૨૩॥

ઋજુમાર્ગપરપ્રીતા ઋષભધ્વજભાસુરા ।
ઋદ્ધિકામમુનિવ્રાતસત્રયાગસમર્ચિતા ॥ ૨૪॥

ૐ ઐં હ્રીં શ્રીં ૠં - ૮॥

ૠકારવાચ્યા ૠક્ષાદિવૃતા ૠકારનાસિકા ।
ૐ ઐં હ્રીં શ્રીં લૃં - ૯॥

લૃકરિણી લૃકારોષ્ઠા
ૐ ઐં હ્રીં શ્રીં લૃં - ૧૦॥

લૃવર્ણાધરપલ્લવા ॥ ૨૫॥

ૐ ઐં હ્રીં શ્રીં એં - ૧૧॥

એકાકિન્યેકમન્ત્રાક્ષરૈર્ધિતોત્સાહવલ્લભા ।
ૐ ઐં હ્રીં શ્રીં ઐં - ૧૨॥

ઐશ્વર્યદાત્રી
ૐ ઐં હ્રીં શ્રીં ઓં - ૧૩॥

ચોઙ્કારવાદિવાગીશસિદ્ધિદા ॥ ૨૬॥

ઓજઃપુઞ્જઘનીસાન્દ્રરૂપિણ્યોઙ્કારમધ્યગા ।
ઓષધીશમનુપ્રીતા
ૐ ઐં હ્રીં શ્રીં ઔં - ૧૪॥

ચૌદાર્યગુપાવારિધિઃ ॥ ૨૭॥

ઔપમ્યરહિતાચૈવ
ૐ ઐં હ્રીં શ્રીં અં - ૧૫॥

અમ્બુજાસનસુન્દરી ।
અમ્બરાધીશનટનસાક્ષિણી
ૐ ઐં હ્રીં શ્રીં અઃ - ૧૬॥

અઃ પદદાયિની ॥ ૨૮॥

ૐ ઐં હ્રીં શ્રીં કં - ૧૭॥

કબરીબન્ધમુખરીભમરભ્રમરાલકા ।
કરવાલલતાધારાભીષણા કૌમુદીનિભા ॥ ૨૯॥

કર્પૂરામ્બા કાલરાત્રિઃ કાલી કલિવિનાશિની ।
કાદિવિદ્યામયી કામ્યા કાઞ્ચનાભા કલાવતી ॥ ૩૦॥

કામેશ્વરી કામરાજમનુપ્રીતા કૃપાવતી ।
કાર્તવીર્યદ્વિસાહસ્રદોર્દણ્ડપટહધ્વનિઃ ॥ ૩૧॥

કિટિવક્ત્રાધિકારોદ્યદ્વ્રણપ્રોત્સાહિતાઙ્ગના ।

કીર્તિપ્રદા કીર્તિમતી કુમારી કુલસુન્દરી ॥ ૩૨॥

કુન્તાયુધધરા કુબ્જિકામ્બા કુધ્રવિહારિણી ।
કુલાગમરહસ્યજ્ઞવાઞ્છાદાનપરાયણા ॥ ૩૩॥

કૂટસ્થિતિજુષી કૂર્મપૃષ્ઠજિત્પ્રપદાન્વિતા ।
કેકાશબ્દતિરસ્કારિબાણાસનમણીરવા ॥ ૩૪॥

કેશાકેશિચણા કેશિરાક્ષસાધિપમર્દિની ।
કૈતકચ્છદસન્ધ્યાભપિશઙ્ગિતકચામ્બુદા ॥ ૩૫॥

કૈલાસોત્તુઙ્ગશ‍ૃઙ્ગાદ્રવિલાસેશપરાજિતા ।
કૈશિક્યારભટીરીતિસ્તુતરક્તેશ્વરીપ્રિયા ॥ ૩૬॥

કોકાહિતકરસ્પર્ધિનખા કોકિલવાદિની ।
કોપહુઙ્કારસન્ત્રસ્તસસેનાસુરનાયકા ॥ ૩૭॥

કોલાહલરવોદ્રેકરિઙ્ખજ્જમ્બુકમણ્ડલા ।
કૌણ્ડિન્યાન્વયસમ્ભૂતા કરિચર્માંમ્બરપ્રિયા ॥ ૩૮॥

કૌપીનશિષ્ટવિપ્રર્ષિસ્તુતા કૌલિકદેશિકા ।
કૌસુમ્ભાસ્તરણા કૌલમાર્ગનિષ્ઠાન્તરાસ્થિતા ॥ ૩૯॥

કઙ્કણાહિગણક્ષેમવચનોદ્વિગ્નતાર્ક્ષ્યકા ।
કઞ્જાક્ષી કઞ્જવિનુતા કઞ્જજાતિપ્રિયઙ્કરી ॥ ૪૦॥

ૐ ઐં હ્રીં શ્રીં ખં - ૧૮॥

ખડ્ગખેટકદોર્દણ્ડા ખટ્વાઙ્ગી ખડ્ગસિદ્ધિદા ।
ખણ્ડિતાસુરગર્વાદ્રિઃ ખલાદૃષ્ટસ્વરૂપિણી ॥ ૪૧॥

ખણ્ડેન્દુમૌલિહૃદયા ખણ્ડિતાર્કેન્દુમણ્ડલા ।
ખરાંશુતાપશમની ખસ્થા ખેચરસંસ્તુતા ॥ ૪૨॥

ખેચરી ખેચરીમુદ્રા ખેચરાધીશવાહના ।
ખેલાપારાવતરતિપ્રીતા ખાદ્યાયિતાન્તકા ॥ ૪૩॥

ઓં ઐં હ્રીં શ્રીં ગં - ૧૯॥

ગગના ગગનાન્તસ્થા ગગનાકારમધ્યમા ।
ગજારૂઢા ગજમુખી ગાથાગીતામરાઙ્ગના ॥ ૪૪॥

ગદાધરી ગદાઽઽઘાતમૂર્છિતાનેકપાસુરા ।
ગરિમાલઘિમાસિદ્ધિવૃતા ગ્રામાદિપાલિની ॥ ૪૫॥

ગર્વિતા ગન્ધવસના ગન્ધવાહસમર્ચિતા ।
ગર્વિતાસુરદારાશ્રુપઙ્કિતાજિવસુન્ધરા ॥ ૪૬॥

ગાયત્રી ગાનસન્તુષ્ટા ગન્ધર્વાધિપતીડિતા ।
ગિરિદુર્ગા ગિરીશાનસુતા ગિરિવરાશ્રયા ॥ ૪૭॥

ગિરીન્દ્રક્રૂરકઠિનકર્ષદ્ધલવરાયુધા ।
ગીતચારિત્રહરિતશુકૈકગતમાનસા ॥ ૪૮॥

ગીતિશાસ્ત્રગુરુઃ ગીતિહૃદયા ગીર્ગિરીશ્વરી ।
ગીર્વાણદનુજાચાર્યપૂજિતા ગૃધ્રવાહના ॥ ૪૯॥

ગુડપાયસસન્તુષ્ટહૃદ્યપ્રતરયોગિની ।
ગુણાતીતા ગુરુર્ગૌરી ગોપ્ત્રી ગોવિન્દસોદરી ॥ ૫૦॥

ગુરુમૂર્તિર્ગુણામ્ભોધિર્ગુણાગુણવિવર્જિતા ।
ગુહેષ્ટદા ગુહાવાસિયોગિચિન્તિતરૂપિણી ॥ ૫૧॥

ગુહ્યાગમરહસ્યજ્ઞા ગુહ્યકાનન્દદાયિની ।
ગુહ્યા ગુહ્યાર્ચિતા ગુહ્યસ્થાનબિન્દુસ્વરૂપિણી ॥ ૫૨॥

ગોદાવરીનદીતીરવાસિની ગુણવર્જિતા ।
ગોમેદકમણીકર્ણકુણ્ડલા ગોપપાલિની ॥ ૫૩॥

ગોસવાસક્તહૃદયા ગોશ ृ ઙ્ગધ્યાનમોદિની ।
ગઙ્ગાગર્વહ્રુષોદ્યુક્તરુદ્રપ્રોત્સાહવાદિની ॥ ૫૪॥

ગન્ધર્વવનિતામાલામોદિની ગર્વનાશિની ।
ગુઞ્જામણિગણપ્રોતમાલાભાસુરકન્ધરા ॥ ૫૫॥

ઓં ઐં હ્રીં શ્રીં ઘં - ૨૦॥

ઘટવાદ્યપ્રિયા ઘોરકોણપઘ્ની ઘટાર્ગલા ।
ઘટિકા ઘટિકામુખ્યષટ્પારાયણમોદિની ॥ ૫૬॥

ઘણ્ટાકર્ણાદિવિનુતા ઘનજ્યોતિર્લતાનિભા ।
ઘનશ્યામા ઘટોત્ભૂતતાપસાત્માર્થદેવતા ॥ ૫૭॥

ઘનસારાનુલિપ્તાઙ્ગી ઘોણોદ્ધૃતવસુન્ધરા ।
ઘનસ્ફટિકસઙ્ક્લૃપ્તસાલાન્તરકદમ્બકા ॥ ૫૮॥

ઘનાલ્યુદ્ભેદશિખરગોપુરાનેકમન્દિરા ।
ઘૂર્ણીતાક્ષી ઘૃણાસિન્ધુઃ ઘૃણિવિદ્યા ઘટેશ્વરી ॥ ૫૯॥

ઘૃતકાતિન્યહૃદ્ઘણ્ટામણિમાલાપ્રસાધના ।
ઘોરકૃત્યા ઘોરવાદ્યા ઘોરાઘૌઘવિનાશિની ॥ ૬૦॥

ઘોરાઘનકૃપાયુક્તા ઘનનીલામ્બરાન્વિતા ।
ઘોરાસ્યા ઘોરશૂલાગ્રપ્રોતાસુરકલેવરા ॥ ૬૧॥

ઘોષત્રસ્તાન્તકભટા ઘોરસઙ્ઘોષકૃદ્ધલા ।
ૐ ઐં હ્રીં શ્રીં ઙં - ૨૧॥

ઙાન્તાર્ણાદ્યમનુપ્રીતા ઙાકારાડીમ્પરાયણા ॥ ૬૨॥

ઙીકારિમમઞ્જુમઞ્જીરચરણા ઙાઙ્કિત્તાઙ્ગુલિઃ ।
ઓં ઐ હ્રીં શ્રીં ચં - ૨૨॥

ચક્રવર્તિસમારાધ્યા ચક્રનેમિરવોન્તુકા ॥ ૬૩॥

ચણ્ડમાર્ણ્ડધિક્કારિપ્રભા ચક્રાધિનાયિકા ।
ચણ્ડાલાસ્યપરામોદા ચણ્ડવાદપટીયસી ॥ ૬૪॥

ચણ્ડિકા ચણ્ડકોદણ્ડા ચણ્ડઘ્ની ચણ્ડભૈરવી ।
ચતુરા ચતુરામ્નાયશિરોલક્ષિતરૂપિણી ॥ ૬૫॥

ચતુરઙ્ગબલોપેતા ચરાચરવિનોદિની ।
ચતુર્વક્ત્રા ચક્રહસ્તા ચક્રપાણિસમર્ચિતા ॥ ૬૬॥

ચતુષ્ષષ્ટિકલારૂપા ચતુષ્ષષ્ટ્યચર્ચનોસ્તુકા ।
ચન્દ્રમણ્ડલન્ધ્યયસ્થા ચતુર્વર્ગફલપ્રદા ॥ ૬૭॥

ચમરીમૃગયોદ્યુક્તા ચિરઞ્જીવિત્વદાયિની ।
ચમ્પકાશોકસ્રદ્ધદ્ધચિકુરા ચરુભક્ષિણી ॥ ૬૮॥

ચરાચરજગદ્ધાત્રી ચન્દ્રિકાધવલસ્મિતા ।
ચર્મામ્બરધરા ચણ્ડક્રોધહુઙ્કારભીકરા ॥ ૬૯॥

ચાટુવાદપ્રિયા ચામીકરપર્વતવાસિની ।

ચાપિની ચાપમુક્તેષુચ્છન્નદિગ્ભ્રાન્તપન્નગા ॥ ૭૦॥

ચિત્રભાનુમુખી ચિત્રસેના ચિત્રાઙ્ગદેષ્ટદા ।
ચિત્રલેખા ચિદાકાશમધ્યગા ચિન્તિતાર્થદા ॥ ૭૧॥

ચિન્ત્યા ચિરન્તની ચિત્રા ચિત્રામ્બા ચિત્તવાસિની ।
ચૈતન્યરૂપા ચિચ્છક્તિશ્ચિદમ્બરવિહારિણી ॥ ૭૨॥

ચોરઘ્ની ચૌર્યવિમુખા ચતુર્દશમનુપ્રિયા ।
ઓં ઐં હ્રીં શ્રીં છં - ૨૩॥

છત્રચામરભૃલ્લક્ષ્મીવાગિન્દ્રાણીરતીવૃતા ॥ ૭૩॥

છન્દશ્શાસ્ત્રમયી છન્દોલક્ષ્યાચ્છેદવિવર્જિતા ।
છન્દોરૂપાછન્દગતિઃ છન્દશ્શિરવિહારિણી ॥ ૭૪॥

છદ્મહૃત્છવિસન્દીપ્તસૂર્યચન્દ્રાગ્નિતારકા ।
છર્દિતાણ્ડાવલિશ્છાદિતાકારા છિન્નસંશયા ॥ ૭૫॥

છાયાપતિસમારાધ્યા છાયામ્બા છત્રસેવિતા ।
છિન્નમસ્તાબિકા છિન્નશીર્ષશત્રુશ્છલાન્તકી ॥ ૭૬॥

છેદિતાસુરજિહ્વાગ્રા છત્રીકૃતયશસ્વિની ।
ૐ ઐં હ્રીં શ્રીં જં - ૨૪॥

જગન્માતા જગત્સાક્ષી જગદ્યોનિર્જગદ્ગુરુઃ ॥ ૭૭॥

જગન્માયા જગન્ત્વૃન્દવન્દિતા જયિનીજયા ।
જનજાડ્યપ્રતાપઘ્ની જિતાસુરમહાવ્રજા ॥ ૭૮॥

જનની જગદાનન્દદાત્રી જહ્નુસમર્ચિતા ।
જપમાલાવરાભીતિમુદ્રાપુસ્તકધારિણી ॥ ૭૯॥

જપયજ્ઞપરાધીનહૃદયા જગદીશ્વરી ।
જપાકુસુમસઙ્કાશા જન્માદિધ્વંસકારણા ॥ ૮૦॥

જાલન્ધ્રપૂર્ણકામોડ્યાણચતુષ્પીઠરૂપિણી ।
જીવનાર્થિદ્વિજવ્રાતત્રાણનાબદ્ધકઙ્કણા ॥ ૮૧॥

જીવબ્રહ્મૈકતાકાઙ્ક્ષિ જનતાકીર્ણપાર્વભૂઃ ।
જમ્ભિની જમ્ભભિત્પૂજ્યા જાગ્રદાદિત્રયાતિગા ॥ ૮૨॥

જલદગ્નિધરા જ્વાલાપ્રોચ્ચકેશી જ્વરાર્તિહૃત્ ।
જ્વાલામાલિનિકા જ્વાલામુખી જૈમિનિસંસ્તુતા ॥ ૮૩॥

ॐ ઐં હ્રીં શ્રીં ઝં - ૨૫॥

ઝલઞ્ઝલકૃતસ્વર્ણમઞ્જીરા ઝષલોચના ।
ઝષકુણ્ડલિની ઝલ્લરીવાદ્યમુદિતાનના ॥ ૮૪॥

ઝષકેતુસમારાધ્યા ઝષમાંસાન્નભક્ષિણી ।
ઝષોપદ્રવકૃદ્ધન્ત્રી ઝ્મ્રૂમ્મન્ત્રાધિદેવતા ॥ ૮૫॥

ઝઞ્ઝાનિલાતિગમના ઝષરાણ્ણીતસાગરા ।
ॐ ઐં હ્રીં શ્રીં ઞં - ૨૬॥

જ્ઞાનમુદ્રાધરા જ્ઞાનિહૃત્પદ્મકુહરાસ્થિતા ॥ ૮૬॥

જ્ઞાનમૂર્તિર્જ્ઞનિગમ્યા જ્ઞાનદા જ્ઞાતિવર્જિતા ।
જ્ઞેયા જ્ઞેયાદિરહિતા જ્ઞાત્રી જ્ઞાનસ્વરૂપિણી ॥ ૮૭॥

ઓં ઐં હ્રીં શ્રીં ટં - ૨૭॥

ટઙ્કપુષ્પાલિસ્રઙ્મઞ્જુકન્ધરા ટઙ્કિતાચલા ।
ટઙ્કવેત્રાદિકાનેકશસ્ત્રભૃદ્દોર્લતાવલિઃ ॥ ૮૮॥

ઓં ઐ હ્રીં શ્રીં ઠં - ૨૮॥

ઠકારનિભવક્ષોજદ્વયાધોવૃત્તભાસુરા ।
ઠકારાઙ્કિતજાન્વગ્રજિતકોરકિતામ્બુજા ॥ ૮૯॥

ઓં ઐં હ્રીં શ્રીં ડં - ૨૯॥

ડાકિની ડામરીતન્ત્રરૂપા ડાડિમપાટલા ।
ડમ્બઘ્ની ડમ્બરાડડમ્બરોન્મુખી ડમરુપ્રિયા ॥ ૯૦॥

ડિમ્બદાનચણા ડોલામુદિતા ડુણ્ઠિપૂજિતા ।
ઓં ઐં હ્રીં શ્રીં ઢં - ૩૦॥

ઢકાનિનદસન્તુષ્ટશિખિનૃત્તસમુત્સુકા ॥ ૯૧॥

ઓં ઐં હ્રીં શ્રીં ણં - ૩૧॥

ણકારપઞ્જરશુકી ણકારોદ્યાનકોકિલા ।
ઓં ઐં હ્રીં શ્રીં તં - ૩૨॥

તત્ત્વાતીતા તપોલક્ષ્યા તપ્તકાઞ્ચનસન્નિભા ॥ ૯૨॥

તન્ત્રી તત્ત્વમસીવાક્યવિષયા તરુણીવૃતા ।
તર્જન્યઙ્ગુષ્ઠસંયોગજ્ઞાનબ્રહ્મમુનીશ્વરા ॥ ૯૩॥

તર્જિતાનેકદનુજા તક્ષકી તડિતાલિભા ।
તામ્રચૂડધ્વજોત્સઙ્ગા તાપત્રયવિનાશિની ॥ ૯૪॥

તારામ્બા તારકી તારાપૂજ્યા તાણ્ડવલોલુપા ।
તિલોત્તમાદિદેવસ્ત્રીશારીરોન્સુકમાનસા ॥ ૯૫॥

તિલ્વદ્રુસઙ્કુલાભોગકાન્તારાન્તરવાસિની ।
ત્રયીદ્વિડ્રસનારક્તપાનલોલાસિધારિણી ॥ ૯૬॥

ત્રયીમયી ત્રયીવેદ્યા ત્ર્યચ્યન્તોદ્ગીતવૈભવા ।
ત્રિકોણસ્થા ત્રિકાલજ્ઞા ત્રિકૂટા ત્રિપુરેશ્વરી ॥ ૯૭॥

ત્રિચત્વારિંશદશ્રાઙ્કચક્રાન્તર્બિન્દુસંસ્થિતા ।
ત્રિતારા તુમ્બુરૂદ્ગીતા તાર્ક્ષ્યાકારા ત્રિકાગ્નિજા ॥ ૯૮॥

ત્રિપુરા ત્રિપુરધ્વંસિપ્રિયા ત્રિપુરસુન્દરી ।
ત્રિસ્થા ત્રિમૂર્તિસહજશક્તિસ્ત્રિપુરભૈરવી ॥ ૯૯॥

ૐ ઐં હ્રીં શ્રીં થં - ૩૩॥

થાં થીકરમૃદગાદિભૃદ્વિષ્ણુમુખસેવિતા ।
થાં થીં તક્તક થિં તોકૃત્તાલધ્વનિસભાઙ્ગણા ॥ ૧૦૦॥

ૐ ઐં હ્રીં શ્રીં દં - ૩૪॥

દક્ષા દાક્ષાયણી દક્ષપ્રજાપતિમખાન્તકી ।
દક્ષિણાચારરસિકા દયાસમ્પૂર્ણમાનસા ॥ ૧૦૧॥

દારિદ્ર્યોન્મૂલિની દાનશીલા દોષવિવર્જિતા ।
દારુકાન્તકરી દારુકારણ્યમુનિમોહિની ॥ ૧૦૨॥

દીર્ઘદંષ્ટ્રાનના દીર્ઘરસનાગીર્ણદાનવા ।
દીક્ષિતા દીક્ષિતારાધ્યા દીનસંરક્ષણોદ્યતા ॥ ૧૦૩॥

દુઃખાબ્ધિબડબા દુર્ગા દુમ્બીજા દુરિતાપહા ।

દુષ્ટદૂરા દુરાચારશમની ધૂતવેદિની ॥ ૧૦૪॥

દ્વિજાવગૂરણસ્વાન્તપિશિતામોદિતાણ્ડજા ।
ૐ ઐં હ્રીં શ્રીં ધં - ૩૫॥

ધનદા ધનદારાધ્યા ધનદામ્રકુટુમ્બિની ॥ ૧૦૫॥

ધરાધરાત્મજા ધર્મરૂપા ધરણિધૂર્ધરા ।
ધાત્રી ધાતૃશિરચ્છેત્રી ધીધ્યેયા ધ્રુવપૂજિતા ॥ ૧૦૬॥

ધૂમાવતી ધૂમ્રનેત્રગર્વસંહારિણી ધૃતિઃ ।
ૐ ઐં હ્રીં શ્રીં નં - ૩૬॥

નખોત્પન્નદશાકારમાધવા નકુલીશ્વરી ॥ ૧૦૭॥

નરનારાયણસ્તુત્યા નલિનાયતલોચના ।
નરાસ્થિસ્રગ્ધરા નારી નરપ્રેતોપરિસ્થિતા ॥ ૧૦૮॥

નવાક્ષરીનામમન્ત્રજપપ્રીતા નટેશ્વરી ।
નાદચામુણ્ડિકા નાનારૂપકૃન્નાસ્તિકાન્તકી ॥ ૧૦૯॥

નાદબ્રહ્મમયી નામરૂપહીના નતાનના ।
નારાયણી નન્દિવિદ્યા નારદોદ્ગીતવૈભવા ॥ ૧૧૦॥

નિગમાગમસંવેદ્યા નેત્રી નીતિવિશારદા ।
નિર્ગુણા નિત્યસન્તુષ્ટા નિત્યાષોડશિકાવૃતા ॥ ૧૧૧॥

નૃસિંહદર્પશમની નરેન્દ્રગણવન્દિતા ।
નૌકારૂઢાસમુત્તીર્ણભવામ્ભોધિ નિજાશ્રિતા ॥ ૧૧૨॥

ઓં ઐં હ્રીં શ્રીં પં - ૩૭॥

પરમા પરમં જ્યોતિઃ પરબ્રહ્મમયી પરા ।
પરાપરમયી પાશબાણાઙ્કુશધનુર્ધરા ॥ ૧૧૩॥

પરાપ્રાસાદમન્ત્રાર્થા પતઞ્જલિસમર્ચિતા ।
પાપઘ્ની પાશરહિતા પાર્વતી પરમેશ્વરી ॥ ૧૧૪॥

પુણ્યા પુલિન્દિનીપૂજ્યા પ્રાજ્ઞા પ્રજ્ઞાનરૂપિણી ।
પુરાતના પરાશક્તિઃ પઞ્ચવર્ણસ્વરૂપિણી ॥ ૧૧૫॥

પ્રત્યઙ્ગિરાઃ પાનપાત્રધરા પીનોન્નતસ્તની ।

ઓં ઐં હ્રીં શ્રીં ફં - ૩૮॥

ફડર્ણધ્વસ્તપાપૌઘદાસા ફણિવરેડિતા ॥ ૧૧૬॥

ફણિરત્નાસનાસીનકામેશોત્સઙ્ગવાસિની ।
ફલદા ફલ્ગુનપ્રીતા ફુલ્લાનનસરોરુહા ॥ ૧૧૭॥

ફુલ્લોત્તમાઙ્ગસાહસ્રદલપઙ્કજભાસુરા ।
ઓં ઐં હ્રીં શ્રીં બં - ૩૯॥

બન્ધૂકસુમનોરાગા બાદરાયણદેશિકા ॥ ૧૧૮॥

બાલામ્બા બાણકુસુમા બગલામુખિરૂપિણી ।
બિન્દુચક્રસ્થિતા બિન્દુતર્પણપ્રીતમાનસા ॥ ૧૧૯॥

બૃહત્સામસ્તુતા બ્રહ્મમાયા બ્રહ્મર્ષિપૂજિતા ।
બૃહદૈશ્વર્યદા બન્ધહીના બુધસમર્ચિતા ॥ ૧૨૦॥

બ્રહ્મચામુણ્ડિકા બ્રહ્મજનની બ્રાહ્મણપ્રિયા ।
બ્રહ્મજ્ઞાનપ્રદા બ્રહ્મવિદ્યા બ્રહ્માણ્ડનાયિકા ॥ ૧૨૧॥

બ્રહ્મતાલપ્રિયા બ્રહ્મપઞ્ચમઞ્ચકશાયિની । (??)
બ્રહ્માદિવિનુતા બ્રહ્મપત્ની બ્રહ્મપુરસ્થિતા ॥ ૧૨૨॥

બ્રાહ્મીમાહેશ્વરીમુખ્યશક્તિવૃન્દસમાવૃતા ।
ઓં ઐં હ્રીં શ્રીં ભં - ૪૦॥

ભગારાધ્યા ભગવતી ભાર્ગવી ભાર્ગવાર્ચિતા ॥ ૧૨૩॥

ભણ્ડાસુરશિરશ્છેત્રી ભાષાસર્વસ્વદર્શિની ।
ભદ્રા ભદ્રાર્ચિતા ભદ્રકાલી ભર્ગસ્વરૂપિણી ॥ ૧૨૪॥

ભવાની ભાગ્યદા ભીમા ભામતી ભીમસૈનિકા ।
ભુજઙ્ગનટનોદ્યુક્તા ભુજનિર્જિતદાનવા ॥ ૧૨૫॥

ભ્રુકુટીક્રૂરવદના ભ્રૂમધ્યનિલયસ્થિતા ।
ભેતાલનટનપ્રીતા ભોગિરાજાઙ્ગુલીયકા ॥ ૧૨૬॥

ભેરુણ્ડા ભેદનિર્મુક્તા ભૈરવી ભૈરવાર્ચિતા ।
ઓં ઐં હ્રીં શ્રીં મં - ૪૧॥

મણિમણ્ડપમધ્યસ્થા માણિક્યાભરણાન્વિતા ॥ ૧૨૭॥

મનોન્મની મનોગમ્યા મહાદેવપતિવ્રતા ।
મન્ત્રરૂપા મહારાજ્ઞી મહાસિદ્ધાલિસંવૃતા ॥ ૧૨૮॥

મન્દરાદિકૃતાવાસા મહાદેવી મહેશ્વરી ।
મહાહિધમેખલા માર્ગદુર્ગા માઙ્ગલ્યદાયિની ॥ ૧૨૯॥

મહાવતક્રતુપ્રીતા માણિભદ્રસમર્ચિતા । (??)
મહિષાસુરશિરશ્છેદનર્તકી મુણ્ડખમિડની ॥ ૧૩૦॥

માતા મરકટશ્યામા માતઙ્ગી મતિસાક્ષિણી । (??)
માધવી માધવારાધ્યા મધુમાંસપ્રિયા મહી ॥ ૧૩૧॥

મારી મારાન્તક ક્ષોભકારિણી મીનલોચના ।
માલતીકુન્દમાલાઢ્યા માષૌદનસમુન્સુકા ॥ ૧૩૨॥

મિથુનાસક્તહૃદયા મોહિતાશેષવિષ્ટપા ।
મુદ્રા મુદ્રાપ્રિયા મૂર્ખનાશિની મેષભક્ષિણી ॥ ૧૩૩॥

મૂકામ્બા મુખજા મોદજનકાલોકનપ્રિયા ।
મૌનવ્યાખ્યાપરા મૌનસત્યચિન્માત્રલક્ષણા ॥ ૧૩૪॥

મૌઞ્જીકચ્છધરા મૌર્વીદ્વિરેફમુખરોન્મુખા ।
ઓં ઐં હ્રીં શ્રીં યં - ૪૨॥

યજ્ઞવૃન્દપ્રિયા યષ્ટ્રી યાન્તવર્ણસ્વરૂપિણી ॥ ૧૩૫॥

યન્ત્રરૂપા યશોદાત્મજાતસજુતવૈભવા ।
યશસ્કરી યમારાધ્યા યજમાનાકૃતિર્યતિઃ ॥ ૧૩૬॥

યાકિની યક્ષરક્ષાદિવૃતા યજનતર્પણા ।
યાથાર્થ્યવિગ્રહા યોગ્યા યોગિની યોગનાયિકા ॥ ૧૩૭॥

યામિની યજમોત્સાહા યામિનીચરભક્ષિણી ।
યાયજૂકર્ચિતપદા યજ્ઞેશી યક્ષિણીશ્વરી ॥ ૧૩૮॥

યાસાપદ્મધરા યાસાપદ્માન્તરપરિષ્કૃતા ।
યોષાડભયઙ્કરી યોષિદ્વૃન્દવન્દિતપાદુકા ॥ ૧૩૯॥

ૐ ઐં હ્રીં શ્રીં રં - ૪૩॥

રક્તચામુણ્ડિકા રાત્રિદેવતા રાગલોલુપા ।

રક્તબીજપ્રશમની રજોગન્ધનિવારિણી ॥ ૧૪૦॥

રણરગનટીરત્નમજ્જીરચરણામ્બુજા ।
રજધ્વવસ્તાચલા રાગહીનમાનસહંસિની ॥ ૧૪૧॥

રસનાલેપિતક્રૂરરક્તબીજકલેવરા ।
રક્ષાકરી રમા રમ્યા રઞ્જિની રસિકાવૃતા ॥ ૧૪૨॥

રાકિણ્યમ્બા રામનુતા રમાવાણીનિષેવિતા ।
રાગાલાપપરબ્રહ્મ શિરો માલાપ્રસાધના ॥ ૧૪૩॥

રાજરાજેશ્વરી રાજ્ઞી રાજીવનયનપ્રિયા ।
રાજવ્રાતકિરીટાંશુનીરાજિતપદામ્બુજા ॥ ૧૪૪॥

રુદ્રચામુણ્ડિકા રુક્મસદૃશા રુધિરપ્રિયા ।
રુદ્રતાણ્ડવસામર્થ્યદર્શનોત્સુકમાનસા ॥ ૧૪૫॥

રુદ્રાટ્ટહાસસઙ્ક્ષુભ્યજ્જગન્તુષ્ટિવિધાયિની ।
રુદ્રાણી રુદ્રવનિતા રુરુરાજહિતૈષિણી ॥ ૧૪૬॥

રેણુકા રેણુકાસૂનુસ્તુત્યા રેવાવિહારિણી ।
રોગઘ્ની રોષનિર્દગ્ધશત્રુસેનાનિવેશિની ॥ ૧૪૭॥

રોહિણીશાંશુસમ્ભૂતઝરીરત્નવિતાનકા ।
રૌદ્રી રૌદ્રાસ્ત્રનિર્દગ્ધરાક્ષસા રાહુપૂજિતા ॥ ૧૪૮॥

ઓં ઐં હ્રીં શ્રીં લં - ૪૪॥

લઘૂક્તિવલ્ગુસ્તિમિતવાણીત્યક્તવિપઞ્ચિકા ।
લજ્જાવતી લલત્પ્રોચ્ચકેશા લમ્બિપયોધરા ॥ ૧૪૯॥

લયાદિકર્ત્રી લોમાલિલતાનાભીસરઃ કટી ।
લલદોષ્ઠદલદ્વન્દ્વવદના લક્ષ્યદૂરગા ॥ ૧૫૦॥

લલન્તિકામણીભાસ્વન્નિટિલશ્રીમુખામ્બુજા ।
લલાટાર્ધનિશાનાથકલઙ્કોદ્ભાસિલોચના ॥ ૧૫૧॥

લલિતા લોભિની લોભહીના લોકેશ્વરી લઘુઃ ।
લક્ષ્મીર્લક્ષ્મીશસહજા લક્ષ્મણાગ્રજવન્દિતા ॥ ૧૫૨॥

લાકિની લઘિતાપૃભોધિનિવહા લલિતામ્બિકા ।

લાજહોમપ્રિયા લમ્બમુક્તાભાસુરનાસિકા ॥ ૧૫૩॥

લાભાલાભાદિરહિતા લાસ્યદર્શનકોવિદા ।
લાવણ્યદર્શનોદ્વિગ્નરતીશા લઘુભાષિણી ॥ ૧૫૪॥

લાક્ષારસાઞ્ચિતપદા લઘુશ્યામા લતાતનુઃ ।
લાક્ષાલક્ષ્મીતિરસ્કારિયુગલાધરપલ્લવા ॥ ૧૫૫॥

લીલાગતિપરાભૂતહંસા લીલાવિનોદિની ।
લીલાનન્દનકલ્પદ્રુમલતાડોલાવિહારિણી ॥ ૧૫૬॥

લીલાપીતાબ્ધિવિનુતા લીલાસ્વીકૃતવિગ્રહા ।
લીલાશુકોસ્તિમુદિતા લીલામૃગવિહારિણી ॥ ૧૫૭॥

લોકમાતા લોકસૃષ્ટિસ્થિતિસંહારકારિણી ।
લોકાતીતપદા લોકવન્દ્યા લોકૈકસાક્ષિણી ॥ ૧૫૮॥

લોકાતીતાકૃતિર્લબ્ધા માર્ગત્યાગપરાન્તકી । (??)
લોકાનુલ્લઙ્ઘિતનિજશાસના લબ્ધવિગ્રહા ॥ ૧૫૯॥

લોમાવલિ લતા લમ્બિસ્તનયુગ્મનતાનના ।
લોલચિત્તવિદૂરસ્થા લોમલમ્બ્યણ્ડજાલકા ॥ ૧૬૦॥

લબિતારિશિરોહસ્તા લોકરક્ષાપરાયણા ।
ૐ ઐં હ્રીં શ્રીં વં - ૪૫॥

વનદુર્ગા વિન્ધ્યદલવાસિની વામકેશ્વરી ॥ ૧૬૧॥

વશિન્યાદિસ્તુતા વહ્નિજ્વાલોદ્ગારિમુખી વરા ।
વક્ષોજયયુગ્મવિરહાસહિષ્ણુકરશઙ્કુરા ॥ ૧૬૨॥

વાઙ્મનોતીતવિષયા વામાચારસમુત્સુકા ।
વાજપેયાધ્વરાનન્દા વાસુદેવેષ્ટદાયિની ॥ ૧૬૩॥

વાદિત્રધ્વનિસમ્ભ્રાન્તદિગ્ગજાલિર્વિધીડિતા ।
વામદેવવસિષ્ઠાદિપૂજિતા વારિદપ્રભા ॥ ૧૬૪॥

વામસ્તનાશ્લિષ્ટદ્સ્તપદ્મશમ્ભુવિહારિણી ।
વારાહી વાસ્તુમધ્યસ્થા વાસવાન્તઃ પુરેષ્ટદા ॥ ૧૬૫॥

વારાઙ્ગનાનીતપૂર્ણકુમ્ભદીપાલિમણ્ટપા ।

વારિજાસનશીર્ષાલિમાલા વાર્ધિસરોવરા ॥ ૧૬૬॥

વારિતાસુરદર્પશ્રીઃ વાર્ધઘ્નીમન્ત્રરૂપિણી ।
વાર્તાલી વારુણી વિદ્યા વરુણારોગ્યદાયિની ॥ ૧૬૭॥

વિજયા વિજયાસ્તુત્યા વિરૂપા વિશ્વરૂપિણી ।
વિપ્રશત્રુકદમ્બઘ્ની વિપ્રપૂજ્યા વિષાપહા ॥ ૧૬૮॥

વિરિઞ્ચિશિક્ષણોદ્યુક્તમધુકૈટભનાશિની ।
વિશ્વમાતા વિશાલાક્ષી વિરાગા વીશવાહના ॥ ૧૬૯॥

વીતરાગવૃતા વ્યાઘ્રપાદ નૃત્તપ્રદર્શિની ।
વીરભદ્રહતોન્મત્તદક્ષયજ્ઞાશ્રિતામરા ॥ ૧૭૦॥

વેદવેદ્યા વેદરૂપા વેદાનનસરોરુહા ।
વેદાન્તવિષયા વેણુનાદજ્ઞા વેદપૂજિતા ॥ ૧૭૧॥

વૌષટ્મન્ત્રમયાકારા વ્યોમકેશી વિભાવરી । ??
વન્ધ્યા વાગ્વાદિની વન્યમાંસાહારા વનેશ્વરી ॥ ૧૭૨॥

વાઞ્છાકલ્પલતા વાણી વાક્પ્રદા વાગધીશ્વરી ।
ઓં ઐં હ્રીં શ્રીં શં - ૪૬॥

શક્તિવૃન્દાવૃતા શબ્દમયી શ્રીચક્રરૂપિણી ॥ ૧૭૩॥

શબરી શબરીદુર્ગા શરભેશચ્છદાકૃતિઃ ।
શબ્દજાલોદ્ભવઙ્કારવાસન્દિગ્ધતાપસા ॥ ૧૭૪॥

શરણાગતસન્ત્રાણપરાયણપટીયસી ।
શશાઙ્કશેખરા શસ્ત્રધરા શતમુખામ્બુજા ॥ ૧૭૫॥

શાતોદરી શાન્તિમતી શરચ્ચન્દ્રનિભાનના ।
શાપાપનોદનચણા શઙ્કાદોષાદિનાશિની ॥ ૧૭૬॥

શિવકામસુન્દરી શ્રીદા શિવવામાઙ્ગવાસિની ।
શિવા શ્રીદાનનિપુણલોચના શ્રીપતિપ્રિયા ॥ ૧૭૭॥

શુકાદિદ્વિજવૃન્દોક્તિસ્તબ્ધમાનસગીષ્પતિઃ ।
શુક્રમણ્ડલસઙ્કાશમુક્તામાલા શુચિસ્મિતા ॥ ૧૭૮॥

શુક્લદંષ્ટ્રાગ્રસન્દીપ્તપાતાલભ્રાન્તપન્નગા ।

શુભ્રાસના શૂરસેનાવૃતા શૂલાદિનાશિની ॥ ૧૭૯॥

શૂકવૃશ્ચિકનાગાખુર્વૃકહિંસ્રાલિસંવૃતા ।
શૂલિની શૂલઙ્ગાહિશઙ્ખચક્રગદાધરા ॥ ૧૮૦॥

શોકાબ્ધિશોષણોદ્યુક્તબડવા શ્રોત્રિયાવૃતા ।
શઙ્કરાલિઙ્ગનાનન્દમેદુરા શીતલામ્બિકા ॥ ૧૮૧॥

શઙ્કરી શઙ્કરાર્ધાઙ્ગહરા શાક્કરવાહના ।
શમ્ભુકોપાગ્નિનિર્દગ્ધમદનોત્પાદકેક્ષણા ॥ ૧૮૨॥

શામ્ભવી શમ્ભુહસ્તાબ્જલીલારુણકરાવલિઃ ।
શ્રીવિદ્યા શુભદા શુભવસ્ત્રા શુમ્ભાસુરાન્તકી ॥ ૧૮૩॥

ઓં ઐં હ્રીં શ્રીં ષં - ૪૭॥

ષડાધારાબ્જનિલયા ષાડ્ગુણ્યશ્રીપ્રદાયિની ।
ષડૂર્મિઘ્નિ ષડધ્વાન્તપદારૂઢસ્વરૂપિણી ॥ ૧૮૪॥

ષટ્કોણમધ્યનિલયા ષડર્ણા ષાન્તરૂપિણી ।
ષડ્જાદિસ્વરનિર્માત્રી ષડઙ્ગયુવતીશ્વરી ॥ ૧૮૫॥

ષડ્ભાવરહિતા ષણ્ડકણ્ટકી ષણ્મુખપ્રિયા ।
ષડ્સાસ્વાદમુદિતા ષષ્ઠીશાદિમદેવતા ॥ ૧૮૬॥

ષોઢાન્યાસમયાકારા ષોડશાક્ષરદેવતા ।
ઓં ઐં હ્રીં શ્રીં સં - ૪૮॥

સકલા સચ્ચિદાનન્દલક્ષણા સૌખ્યદાયિની ॥ ૧૮૭॥

સનકાદિમુનિધ્યેયા સન્ધ્યાનાટ્યવિશારદા ।
સમસ્તલોકજનની સભાનટનરઞ્જિની ॥ ૧૮૮॥

સરઃ પુલિનલીલાર્થિયુવતીનિવહોત્સુકા ।
સરસ્વતી સુરારાધ્યા સુરાપાનપ્રિયાસુરા ॥ ૧૮૯॥

સરોજલવિહારોદ્યત્પ્રિયાકૃષ્ટોત્તરાંશુકા ।
સાધ્યા સાધ્યાદિરીહતા સ્વતન્ત્રા સ્વસ્તિરૂપિણી ॥ ૧૯૦॥

સાધ્વી સઙ્ગીતરસિકા સર્વદા સર્વમઙ્ગલા ।
સામોદ્ગીતનિજાનન્દમહિમાલિસ્સનાતના ॥ ૧૯૧॥

સારસ્વતપ્રદા સામા સંસારાર્ણવતારિણીમ્ ।
સાવિત્રી સઙ્ગનિર્મુક્તા સતીશી સર્વતોમુખી ॥ ૧૯૨॥

સાખ્યતત્વજ્ઞનિવહવ્યાપિસાલા સુખેશ્વરી ।
સિદ્ધસઙ્ઘાવૃતા સાન્ધ્યવન્દિતા સાધુસત્કૃતા ॥ ૧૯૩॥

સિંહાસનગતા સર્વશૃઙ્ગારરસવારિધિઃ ।
સુધાબ્ધિમધ્યનિલયા સ્વર્ણદ્વીપાન્તરસ્થિતા ॥ ૧૯૪॥

સુધાસિક્તાલવાલોદ્યત્કાયમાનલતાગૃહા ।
સુભગા સુન્દરી સુભ્રૂઃ સમુપાસ્યત્વલક્ષણા ॥ ૧૯૫॥

સુરદ્રુસઙ્કુલાભોગતટા સૌદામિનીનિભા ।
સુરભીકેશસમ્ભ્રાન્તદ્વિરેફમુખરાન્વિતા ॥ ૧૯૬॥

સૂર્યચન્દ્રાંશુધિક્કારિપ્રભારત્નાલિમણ્ડપા ।
સોમપાનોદ્ભવામોદવિપ્રગીતાપદાનકા ॥ ૧૯૭॥

સોમયાગપ્રિયા સોમસૂર્યવહ્નિવિલોચના ।
સૌગન્ધિકમરુદ્વેગમોદિતા સદ્વિલાસિની ॥ ૧૯૮॥

સૌન્દર્યમોહિતાધીનવલ્લભા સન્તતિપ્રદા ।
સૌભાગ્યમન્ત્રિણી સત્યવાદા સાગરમેખલા ॥ ૧૯૯॥

સ્વશ્વાસોચ્છ્વાસભુવનમોચનોન્મોચના સ્વધા ।
ૐ ઐં હ્રીં શ્રીં હં - ૪૯॥

હયારૂઢા હયગ્રીવવિનુતા હતકિલ્બિષા ॥ ૨૦૦॥

હરાલિઙ્ગનશીતાંશૂન્મિષન્નેત્રમુદ્વતી ।
હરિનાભિસમુદ્ભૂતવિરિઞ્ચિવિનુતા હરા ॥ ૨૦૧॥

હાદિવિદ્યા હાનિહીના હાકિની હરિચણ્ડિકા ।
હારાવલિપ્રભાદીપ્ત હરિદન્તદિગમ્બરા ॥ ૨૦૨॥

હાલાહલવિષોદ્વિગ્નવિષ્ટાપાનેકરક્ષકી ।
હાહાકારરવોદ્ગીતદનુજા હારમઞ્જુલા ॥ ૨૦૩॥

હિમાદ્રિતનયા હીરમકુટા હારપન્નગા ।
હુતાશનધરા હોમપ્રિયા હોત્રી હયેશ્વરી ॥ ૨૦૪॥

હેમપદ્મધરા હેમવર્મરાજસમર્ચિતા ।
હંસિની હંસમન્ત્રાર્થા હંસવાહા હરાઙ્ગભૃત્ ॥ ૨૦૫॥

હૃદ્યા હૃદ્યમનોનિત્યવાસા હરકુટુમ્બિની । (??)
હ્રીમતિઃ હૃદયાકાશતરણિઃ હ્રિમ્પરાયણા ॥ ૨૦૬॥

ૐ ઐં હ્રીં શ્રીં ક્ષં - ૫૦॥

ક્ષણદાચરસંહારચતુરા ક્ષુદ્રદુર્મુખા ।
ક્ષણદાર્ચ્યા ક્ષપાનાથસુધાર્દ્રકબરી ક્ષિતિઃ ॥ ૨૦૭॥

ક્ષમા ક્ષમાધરસુતા ક્ષામક્ષોભવિનાશિની ।
ક્ષિપ્રસિદ્ધિમ્પ્રદા ક્ષિપ્રગમના ક્ષુણ્ણિવારિણી ॥ ૨૦૮॥

ક્ષીણપુણ્યાસુહૃત્ ક્ષીરવર્ણા ક્ષયવિવર્જિતા ।
ક્ષીરાન્નાહારમુદિતા ક્ષ્મ્રૂમ્મન્ત્રાપ્તેષ્ટયોગિરાટ્ ॥ ૨૦૯॥

ક્ષીરાબ્ધિતનયા ક્ષીરઘૃતમધ્વાસવાર્ચિતા ।
ક્ષુધાર્તિદીનસન્ત્રાણા ક્ષિતિસંરક્ષણક્ષમા ॥ ૨૧૦॥

ક્ષેમઙ્કુરી ક્ષેત્રપાલવન્દિતા ક્ષેત્રરૂપિણી ।
ક્ષૌમામ્બરધરા ક્ષત્રસમ્પ્રાર્થિતજયોત્સવા ॥ ૨૧૧॥

ક્ષ્વેલભુગ્રસનાસ્વાદ જાત વાગ્રસવૈભવા ।

ઇતિ શ્રીભૃઙ્ગિરિટિસંહિતાયાં શક્ત્યુત્કર્ષપ્રકરણે
શિવગૌરીસંવાદે શ્રીશિવકામસુન્દરીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્

॥ ઉત્તરપીતિકા ॥

ઇત્યેતત્તે મયાઽઽખ્યાતં નામ સાહસ્રમુત્તમમ્ ।
શિવકામસુન્દરીદેવ્યાઃ શિવાયાઃ પરમેશ્વરિ ॥ ૧॥

ચતુર્વેદસ્ય તાત્પર્યસારભૂતં સુખપ્રદમ્ ।
સહસ્રનામક સ્તોત્રરત્નાભિધમિદં પ્રિયે ।
શ્રુત્યન્તવાક્યનિચયબદ્ધં શીઘ્રપ્રસિદ્ધિદમ્ ॥ ૨॥

આયુરારોગ્યદં પુણ્યવર્ધનં ભુક્તિમુક્તિદમ્ ।
વિઘ્નવારણવિઘ્નેશં સંસારધ્વાન્તભાસ્કરમ્ ॥ ૩॥

શોકકાન્તારદાવાગ્નિમજ્ઞાનાબ્ધિઘટોદ્ભવમ્ ।

રોગપર્વતદમ્ભોલિં શત્રુવર્ગાહિતાર્ક્ષ્યકમ્ ॥ ૪॥

સર્વવિદ્યાપ્રદં નૃણાં તુષ્ટિદં પુષ્ટિદં પ્રિયે ।
ભૂતાઃ પ્રેતાઃ પિશાચાશ્ચ બ્રહ્મરક્ષોગણોરગાઃ ॥ ૫॥

જટામુનિગણાઃ ક્ષુદ્રજ્વરકૃદ્ગ્રહમણ્ડલાઃ ।
કોટરારેવતીજ્યેષ્ઠાપૂતનામાતૃકાદયઃ ॥ ૬॥

મહાજ્વરકરાશ્ચાન્યે ભેતાલાગ્નિધરાશ્શિવે ।
અપસ્મારાદિમાશ્ચાન્યે દૃષ્ટા હિંસારારાશ્શિવે ॥ ૭॥

રાક્ષસા મનુજા યજ્ઞવિઘ્નભૂતાશ્ચ પન્નગાઃ ।
સાલુવાઃ શરભાઃ સિંહાઃ વ્યાઘ્રા ઋક્ષા ગજા વૃષાઃ ।
શાક્કરા મહિષાચ્છગાઃ ગવયાવૃકજમ્બુકાઃ ।
અન્યે વન્યા મૃગા દેવિ હિંસકાશ્શૂકવૃશ્ચિકાઃ ॥ ૯॥

અણ્ડજાસ્સ્વેદજા દેવિ ચોદ્ભિદાશ્ચ જરાયુજાઃ ।
યે યે હિંસાકરાસ્સર્વે નામસાહસ્રજાપિનમ્ ॥ ૧૦॥

દૃષ્ટ્વા ભીત્યા પરિભ્રાન્તાઃ સ્ખલન્તશ્ચ વિદૂરતઃ ।
પતન્તશ્ચ પલાયન્તે પ્રાણત્રાણપરાયણાઃ ॥ ૧૧॥

અમ્બિકાનામસાહસ્રજપશીલસ્ય યોગિનઃ ।
દ્રવ્યાણિ યોઽપહરતે તં ભક્ષયતિ યોગિની ॥ ૧૨॥

શિવકામસુન્દરીભસ્તિશાલિનં દ્વેષ્ટિ યો નરઃ ।
તં નાશયતિ સા દેવી સપુત્રગણબાન્ધવમ્ ॥ ૧૩॥

શિવકામસુન્દરીભક્તે ચાભિચારાદિદુષ્કૃતિમ્ ।
યઃ પ્રેરયતિ મૂઢાત્મા તં દેવી શિવસુન્દરી ॥ ૧૪॥

મુખાગ્નિજ્વાલયા દેવી દાહયત્યઞ્જસા ધ્રુવમ્ ।
અનેન સદૃશં સ્તોત્રં નાસ્તિ નાસ્ત્યદ્રિકન્યકે ॥ ૧૫॥

એતત્સ્તોત્રજપેનૈવ વિષ્ણુર્લક્ષ્મીશ્વરોઽભવત્ ।
જગદ્રક્ષકકર્તૃત્વં બ્રહ્મણો વેધસઃ પ્રિયે ॥ ૧૬॥

સૃષ્ટિકર્તૃત્વમપ્યમ્બે વેદાનાં ચ વિધાયકઃ ।
અભૂદન્યેઽમરાશ્ચૈવ વહ્નીન્દ્રયમરાક્ષસાઃ ॥ ૧૭॥

જલવાય્વીશધનદાઃ યોગિનશ્ચ મહર્ષયઃ ।

જપાદસ્ય સ્વયં સિદ્ધિં લેભિરે સતતં શિવે ॥ ૧૮॥

મમ શક્તિમયી ત્વં હિ દેવી સા કામસુન્દરી ।
તસ્યાઃ પ્રભાવં નાન્યેન વસ્તું શક્યં હિ સુન્દરિ! ॥ ૧૯॥

ત્વયૈવ ચિન્તનીયં તત્ ત્વત્તો નાન્યાસ્તિ હિ પ્રિયા ।
એતન્નામસહસ્રસ્ય જપે ત્રૈવર્ણિકઃ પ્રિયે ॥ ૨૦॥

મયાધિક્રિયતેઽન્યેષાં ચ ભવેદધિકારતા ।
અન્યે તુ પાઠયેદ્વિપ્રૈઃ લભેરન્દવેષ્ટકામનામ્ ॥ ૨૧॥

યો વિપ્રશ્શાન્તહૃદયઃ નામસાહસ્રમુત્તમમ્ ।
જપતિ શ્રદ્ધયા યુક્તઃ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૨૨॥

શુક્રવારે સૌમવારે ભૌમવારે ગુરોર્દિને ।
દર્શે પર્વણિ પઞ્ચમ્યાં નવમ્યાં કુલસુન્દરિ ॥ ૨૩॥

કૃષ્ણાઙ્ગારચતુર્દશ્યાં સઙ્ક્રાન્તાવયને વિષૌ ।
વૃષે શુક્લનવમ્યાં ચ શ્રાવણ્યાં મૂલભે શુભે ॥ ૨૪॥

આષાઢે ચ તુલાયાં ચ નક્ષત્રે પૂર્વફલ્ગુને ।
જ્યેષ્ઠે ચ ફાલ્ગુને માસિ ઉત્તરે ફલ્ગુને શુભે ॥ ૨૫॥

નક્ષત્રે ચ શુભાં દેવીં ગૌરીનામભિરમ્બિકામ્ ।
અર્ચયેત્સતતં પ્રીતા સુન્દરી ભવતિ પ્રિયે ॥ ૨૬॥

પ્રતિપન્મુખરાકાન્તદિનરાત્રિષુ ચામ્બિકામ્ ।
અર્ચયેત્કુસુમૈર્બિલ્વૈઃ હારિદ્રૈઃ કુકુમૈઃ શુભૈઃ ॥ ૨૭॥

હરિદ્રાચૂર્ણસમ્પૃક્તૈરક્ષતૈર્તુલસીદલૈઃ ।
કેસરૈઃ કેતકૈશ્ચૈવ મન્દારૈશ્ચમ્પકૈરપિ ॥ ૨૮॥

પ્રથમં ગન્ધતૈલેનાભિષિચ્ય તતઃ પરમ્ ।
પયસા મધુના દધ્ના ઘૃતેન લિકુચેન ચ ॥ ૨૯॥

નારિકેલામ્રપનસકદલીનાં ફલત્રયમ્ ।
શર્કરામધુસમ્પૃક્તં પઞ્ચામૃતમથામ્બિકામ્ ॥ ૩૦॥

અભિષિચ્ય તતઃ પશ્ચાત્સગન્ધીશ્ચન્દનૈઃ શુભૈઃ ।
અન્નૈશ્ચ કુઙ્કુમૈશ્ચૈવ ફલાનાં ચ રસૈસ્તથા ॥ ૩૧॥

ગઙ્ગામ્બુભિસ્તતઃ કુર્યાત્વાસિતૈઃ સલિલૈશ્શુભૈઃ ।
સમ્યગુન્માર્જ્ય વસ્ત્રૈશ્ચ પીતામ્બરમુખૈઃ શિવૈઃ ॥ ૩૨॥

આચ્છાદ્ય કઞ્ચુકૈશ્ચૈવાલઙ્કૃત્યાભરણૈસ્સુમૈઃ ।
શુદ્ધાન્નૈઃ પાયસાન્નૈશ્ચ રસખણ્ડાન્નૈશ્ચ ભક્ષ્યકૈઃ ॥ ૩૩॥

ગુડાન્નૈઃ પાયસાપૂપૈર્માષાપૂપૈશ્ચ લેહ્યકૈઃ ।
ખાદ્યૈશ્ચ વિવિધૈરન્નૈઃ ચિત્રાન્નૈશ્ચ વિશેષતઃ ॥ ૩૪॥

લડ્ડુકૈર્મોદકૈશ્ચાપિ કરમ્ભૈશ્ચ શરાવકૈઃ ।
ફલૈશ્ચ વિવિધૈશ્ચાપિ કુર્યાન્નૈવેદ્યમાદરાત્ ॥ ૩૫॥

ષોડશૈરુપચારૈશ્ચ પૂજયેચ્છિવસુન્દરીમ્ ।
સુવાસિનીઃ કન્યકાશ્ચ વસ્ત્રાન્નૈશ્ચ પ્રપૂજયેત્ ॥ ૩૬॥

એભિર્નામભિરેવૈતાં મૂર્તે યન્ત્રે ઘટેઽપિ વા ।
આવાહ્યાભ્યર્ચ્યયેદ્દેવીં જપેદ્વા સન્નિધૌ સ્તુતિમ્ ॥ ૩૭॥

યં યં કામયતે શીઘ્રં તં તં પ્રાપ્નોત્યસંશયઃ ।
વિદ્યાર્થી લભતે વિદ્યાં પુત્રાર્થી પુત્રમાપ્નુયાત્ ॥ ૩૮॥

કન્યાર્થી લભતે કન્યાં અપ્સરસ્સદૃશીં શિવે ।
ધનાર્થી લભતે શીઘ્રં ધનં ભૂરિ મહેશ્વરિ ॥ ૩૯॥

શ્રીવિદ્યોપાસ્તિશીલાનામાત્મરક્ષાર્થમાદરાત્ ।
શત્રુનિર્ઘાતનાર્થઞ્ચ સ્વદાસાનુગ્રહાય ચ ॥ ૪૦॥

જપ્તવ્યં સતતં ભદ્રે શ્રુતિવદ્વાગ્યતશ્શુચિઃ ।
સર્વમન્ત્રાધિકારત્વાત્ શ્રીવિદ્યોપાસકસ્ય તુ ॥ ૪૧॥

ગુરું સ્વયં જપ્યં વિના સુન્દર્યેવાસ્ય દેશિકા ।
તેષામેવ વિધિઃ પ્રોક્તો નાન્યેષાં મેનકાત્મન્તે ॥ ૪૨॥

ઉપદેશાદેવ ચ ગુરોઃ જપ્તવ્યં શિવભાષિતમ્ ।
શ્રીચક્રપુરસમાજસ્ત્રિપુરાતુષ્ટિકારણમ્ ॥ ૪૩॥

તત્ત્વમસ્યાદિવાક્યાર્થપરબ્રહ્મપદપ્રદમ્ ।
શિવજ્ઞાનપ્રદં દેવિ શીઘ્રસિદ્ધિકરં પરમ્ ॥ ૪૪॥

શ્રૌતસ્માર્તાદિકર્માદૌ ભક્ત્યેદં યો જપેત્પ્રિયે ।
અવિઘ્નેન ચ તત્કર્મ સાફલ્યં ચૈતિ નિશ્ચયઃ ॥ ૪૫॥

યુદ્ધે પ્રયાણે દુર્દ્ધર્ષે સ્વપ્ને વાતે જલે ભયે ।
જપ્તવ્યં સતતં ભદ્રે તત્તચ્છાન્ત્યૈ મહેશ્વરિ ॥ ૪૬॥

તત્તન્માતૃકયા પુસ્તં ત્રિતારેણ સમન્વિતમ્ ।
સ્તોત્રમેતજ્જપેદ્દેવીમર્ચયેચ્ચ વિશેષતઃ ॥ ૪૭॥

સદા તસ્ય હૃદમ્ભોજે સુન્દરી વસતિ ધ્રુવમ્ ।
અણિમાદિમહાસિદ્ધીઃ લભતે નાત્ર સંશયઃ ॥ ૪૮॥

અશ્વમેધાદિભિર્યજ્ઞૈઃ યત્ફલં તત્ સુદુર્લભમ્ ।
અણિમાદિમમહાસિદ્ધીઃ લભતે નાત્ર સંશયઃ ॥ ૪૯॥

એભિર્નામભિરેવં યઃ કાલીં દુર્ગાઞ્ચ ચણ્ડિકામ્ ।
અર્ચયેત્સતતં ભક્ત્યા યે સર્વાન્કામાંલ્લભેન્નરઃ ॥ ૫૦॥

સુન્દરીમૂર્તિભેદાશ્ચ કાલી દુર્ગા ચ ચણ્ડિકા ॥ ૫૧॥

એકૈવ શક્તિઃ પરમેશ્વરસ્ય
ભિન્ના ચતુર્ધા વિનિયોગકાલે ।
ભોગે ભવાની પુરુષેષુ વિષ્ણુઃ
કોપેષુ કાલી સમરેષુ દુર્ગા ॥ ૫૨॥

એકા શક્તિશ્ચ શમ્ભોર્વિનિમયનવિધૌ સા ચતુર્ધા વિભિન્ના
ક્રોધે કાલી વિજાતાચ સમરસમયે સા ચ ચણ્ડી ચ દુર્ગા ।
ભોગે સૃષ્ટૌ નિયોગે ચ સકલજગતાં સા ભવાની ચ જાતા
સર્વેષાં રક્ષણાનુગ્રહકરણવિધૌ તસ્ય વિષ્ણુર્ભવેત્સા ॥ ૫૨॥

સમ્પ્રયચ્છતિ તસ્યેષ્ટમચિરાદેવ સુન્દરી ।
સ્તોત્રરત્નમિદં ભદ્રે સદા નિષ્કામનાયુતઃ ॥ ૫૩॥

યો જપેન્મામકં ધામ બ્રહ્મવિષ્ણ્વાદિદુર્લભમ્ ।
સત્યજ્ઞાનમનન્તાખ્યં બ્રાહ્મં કૈવલ્યસઞ્જ્ઞકમ્ ॥ ૫૪॥

ભવાબ્ધિતારકં સોઽપિ પ્રાપ્નોતિ મદનુગ્રહાત્ ।
ચિત્સભાયાં નૃત્યમાનનટરાજસ્ય સાક્ષિણી ॥ ૫૫॥

તસ્યૈવ મહિષી નામ્ના શિવકામા ચ સુન્દરી ।
સા પરબ્રહ્મમહિષી સદાનન્દા શુભપ્રદા ॥ ૫૬॥

શિવકામસુન્દરીનામ્નાં સહસ્રં પ્રોક્તમમ્બિકે ।
એતસ્ય સદૃશં સ્તોત્રં નાસ્તિ નાસ્તિ જગત્ત્રયે ॥ ૫૭॥

સત્યં સત્યં પુનસ્સત્યં ત્વાં શપેઽહં વદામિ તે ।
નાસ્તિકાય કૃતઘ્નાય વિપ્રદ્વેષપરાય ચ ॥ ૫૮॥

ન દેયં વેદવિપ્રર્ષિભક્તિયુક્તાય શામ્ભવિ ।
દેયં ત્રિપુરવિદ્યેશીત્યથર્વશ્રુતિ ચોદિતમ્ ॥ ૫૯॥

વિસ્તૃતેન કિમન્યચ્ચ શ્રોતુકામાસિ સુન્દરિ ।
ઇતિ નિગદિતવન્તં રાજતે પર્વતેઽસ્મિન્
નવમણિગણપીઠે સંસ્થિતં દેવમીશમ્ ।
મુહુરપિ કૃતનમ્રા ભક્તિનમ્રા ભવાની
કરયુગસરસિજેનાલિલિઙ્ગાતિગાઢમ્ ॥ ૬૦॥

ઇતિ શ્રીભૃઙ્ગિરિટિસંહિતાયાં શક્ત્યુત્કર્ષપ્રકરણે શિવગૌરીસંવાદે
શ્રીશિવકામસુન્દરીસહસ્રનામસ્તોત્રોત્તરપીઠિકા સમ્પૂર્ણા ॥

॥ શિવમસ્તુ ॥

Proofread by DPD

*Shri Shivakamasundari Sahasranama Stotram*
pdf was typeset on November 17, 2024

Please send corrections to *sanskrit@cheerful.com*